# agastyAShTakam

# શિવાષ્ટકમ્ અગસ્ત્યકૃત અથવા અગસ્ત્યાષ્ટકમ્

## Document Information

Text title : shivAShTakam by Agastya Rishi

File name : agastyAShTakam.itx

Category : aShTaka, shiva

Location : doc_shiva

Transliterated by : N.Balasubramanian bbalu at sify.com

Proofread by : N.Balasubramanian, Aruna Narayanan

Description-comments : From stotrArNavaH 02-20

Latest update : August 10, 2007

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

January 7, 2022

*sanskritdocuments.org*

# શિવાષ્ટકમ્ અગસ્ત્યકૃત અથવા અગસ્ત્યાષ્ટકમ્

અગસ્ત્યપ્રોક્તં શિવાષ્ટકમ્ ।

અદ્ય મે સફલં જન્મ ચાદ્ય મે સફલં તપઃ ।
અદ્ય મે સફલં જ્ઞાનં શમ્ભો ત્વત્પાદદર્શનાત્ ॥ ૧॥

કૃતાર્થોઽહં કૃતાર્થોઽહં કૃતાર્થોઽહં મહેશ્વર ।
અદ્ય તે પાદપદ્મસ્ય દર્શનાત્ભક્તવત્સલ ॥ ૨॥

શિવશ્શમ્ભુઃ શિવશ્શમ્ભુઃ શિવશ્શમ્ભુઃ શિવશ્શિવઃ ।
ઇતિ વ્યાહરતો નિત્યં દિનાન્યાયાન્તુ યાન્તુ મે ॥ ૩॥

શિવે ભક્તિશ્શિવે ભક્તિશ્શિવે ભક્તિર્ભવેભવે ।
સદા ભૂયાત્ સદા ભૂયાત્સદા ભૂયાત્સુનિશ્ચલા ॥ ૪॥

આજન્મ મરણં યસ્ય મહાદેવાન્યદૈવતમ્ ।
માજનિષ્યત મદ્વંશે જાતો વા દ્રાગ્વિપદ્યતામ્ ॥ ૫॥

જાતસ્ય જાયમાનસ્ય ગર્ભસ્થસ્યાઽપિ દેહિનઃ ।
માભૂન્મમ કુલે જન્મ યસ્ય શમ્ભુર્ન-દૈવતમ્ ॥ ૬॥

વયં ધન્યા વયં ધન્યા વયં ધન્યા જગત્ત્રયે ।
આદિદેવો મહાદેવો યદસ્મત્કુલદૈવતમ્ ॥ ૭॥

હર શમ્ભો મહાદેવ વિશ્વેશામરવલ્લભ ।
શિવશઙ્કર સર્વાત્મન્નીલકણ્ઠ નમોઽસ્તુ તે ॥ ૮॥

અગસ્ત્યાષ્ટકમેતત્તુ યઃ પઠેચ્છિવસન્નિધૌ ।
શિવલોકમવાપ્નોતિ શિવેન સહ મોદતે ॥ ૯॥

॥ ઇત્યગસ્ત્યાષ્ટકં સમ્પૂર્ણમ્ ॥

Encoded and proofread by N.Balasubramaniam

*agastyAShTakam*

pdf was typeset on January 7, 2022

Please send corrections to *sanskrit@cheerful.com*